# Shri Hanuman Kavacham 1

## श्री हनुमत् कवचम् १

अस्य श्री हनुमत् कवचस्तोत्रमहामन्त्रस्य वसिष्ठ ऋषिः अनुष्टुप् छन्दः श्री हनुमान् देवता मारुतात्मज इति बीजं अञ्जनासूनुरिति शक्तिः वायुपुत्र इति कीलकं हनुमत्प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

उल्लङ्घ्य सिन्धोस्सलिलं सलीलं
यश्शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ १ ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥ २ ॥

उद्यदादित्यसङ्काशं उदारभुजविक्रमम् ।
कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम् ॥ ३ ॥

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥ ४ ॥

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ५ ॥

पादौ वायुसुतः पातु रामदूतस्तदङ्गुलीः ।
गुल्फौ हरीश्वरः पातु जङ्घे चार्णवलङ्घनः ॥ ६ ॥

जानुनी मारुतिः पातु ऊरू पात्वसुरान्तकः ।
गुह्यं वज्रतनुः पातु जघनं तु जगद्धितः ॥ ७ ॥

आञ्जनेयः कटिं पातु नाभिं सौमित्रिजीवनः ।
उदरं पातु हृद्गेही हृदयं च महाबलः ॥ ८ ॥

वक्षो वालायुधः पातु स्तनौ चाऽमितविक्रमः ।
पार्श्वौ जितेन्द्रियः पातु बाहू सुग्रीवमन्त्रकृत् ॥ ९ ॥

करावक्ष जयी पातु हनुमांश्च तदङ्गुलीः ।
पृष्ठं भविष्यद्ब्रह्मा च स्कन्धौ मति मतां वरः ॥ १० ॥

कण्ठं पातु कपिश्रेष्ठो मुखं रावणदर्पहा ।
वक्त्रं च वक्तृप्रवणो नेत्रे देवगणस्तुतः ॥ ११ ॥

ब्रह्मास्त्रसन्मानकरो भ्रुवौ मे पातु सर्वदा ।
कामरूपः कपोले मे फालं वज्रनखोऽवतु ॥ १२ ॥

शिरो मे पातु सततं जानकीशोकनाशनः ।
श्रीरामभक्तप्रवरः पातु सर्वकलेबरम् ॥ १३ ॥

# Shri Hanuman Kavacham 1

मामह्नि पातु सर्वज्ञः पातु रात्रौ महायशाः ।
विवस्वदन्तेवासी च सन्ध्ययोः पातु सर्वदा ॥ १४ ॥

ब्रह्मादिदेवतादत्तवरः पातु निरन्तरम् ।
य इदं कवचं नित्यं पठेच्च शृणुयान्नरः ॥ १५ ॥

दीर्घमायुरवाप्नोति बलं दृष्टिं च विन्दति ।
पादाक्रान्ता भविष्यन्ति पठतस्तस्य शत्रवः ।
स्थिरां सुकीर्तिमारोग्यं लभते शाश्वतं सुखम् ॥ १६ ॥

इति निगदितवाक्यवृत्त तुभ्यं
सकलमपि स्वयमाञ्जनेय वृत्तम् ।
अपि निजजनरक्षणैकदीक्षो
वशग तदीय महामनुप्रभावः ॥ १७ ॥

इति श्री हनुमत् कवचम् ।